# ध्रुवस्य ध्रुवपदप्राप्तिः

भारतीयजीवने पुराणानामत्यधिकः प्रभावोऽस्ति। पुराणानि वेदव्यासेन रचितानि एवं मन्यते। महापुराणानां सङ्ख्याष्टदशमिता। उपपुराणानि अपि अष्टादश सन्ति। विष्णुपुराणस्य महत्त्वम् महापुराणेषु अतीव प्रसिद्धम्। पाठोऽयं विष्णुपुराणात् गृहीतः। अस्मिन् बालकस्य ध्रुवस्य तपस्यायाः भगवत् प्राप्तेश्च प्रेरणादायकं वर्णनमस्ति।

**प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।**
**द्वौ पुत्रौ तु महावीर्यौ धर्मज्ञौ कथितौ तव ॥1॥**

**अन्वयः** – धर्मज्ञौ तव स्वायम्भुवस्य मनोः तु महावीर्यौ प्रियव्रत उत्तानपादौ द्वौ पुत्रौ कथितौ।

| | | | |
|---|---|---|---|
| **शब्दार्थः** – | धर्मज्ञौ | - | धर्मस्य ज्ञातारौ |
| | महावीर्यौ | - | परमशूरौ |
| | कथितौ | - | उक्तौ |

**तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः।**
**अभीष्टायामभूद् ब्रह्मन्पितुरत्यन्तवल्लभः ॥2॥**

**अन्वयः** – ब्रह्मन्! तयोः उत्तानपादस्य अभीष्टायां सुरुच्यां पितुः अत्यन्तवल्लभः उत्तमः सुतः अभूत्।

| | | | |
|---|---|---|---|
| **शब्दार्थः** – | अत्यन्तवल्लभः | - | अत्यन्तप्रियः |
| | उत्तमः सुतः | - | उत्तमनामकः पुत्रः |
| | अभीष्टायाम् | - | अतिप्रियायाम् |

**सुनीतिर्नाम या राज्ञस्तस्यासीन्महिषी द्विज।**
**स नातिप्रीतिमांस्तस्यामभूद्यस्या ध्रुवः सुतः ॥3॥**

**अन्वयः** – द्विज! तस्य राज्ञः या सुनीतिः नाम महिषी आसीत् यस्याः सुतः ध्रुवः सः तस्याम् अति प्रीतिमान् न अभूत्।

| | | | |
|---|---|---|---|
| **शब्दार्थः** – | राज्ञः | - | नृपस्य |
| | महिषी | - | राज्ञी (महारानी) |

**राजासनस्थितस्याङ्कं पितुर्भ्रातरमाश्रितम्।**
**दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥4॥**

**अन्वयः** – ध्रुवः, राजासनस्थितस्य पितुः अङ्कम् आश्रितम् उत्तमं दृष्ट्वा तमारोढुं मनोरथं चक्रे।

**शब्दार्थः** - अङ्कम् - क्रोडम् (गोद)

दृष्ट्वा - अवलोक्य

चक्रे - अकरोत् (किया)

**सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।**
**स्वपुत्रं च तथारूढं सुरुचिर्वाक्यमब्रवीत् ॥5॥**

**अन्वयः** - सुरुचिः तं सपत्नीतनयम् अङ्कारोहणोत्सुकं च स्वपुत्रं तथा आरुढं दृष्ट्वा वाक्यम् अब्रवीत् ।

**शब्दार्थः** - सपत्नी - स्वपत्युः अपरा पत्नी (दूसरी पत्नी)

तनयम् - पुत्रम्

आरूढम् - उपविष्टम्

**क्रियते किं वृथा वत्स ! महानेष मनोरथः ।**
**अन्यस्त्रीगर्भजातेन ह्यसम्भूय ममोदरे ॥6॥**

**अन्वयः** - वत्स ! मम उदरे हि असम्भूय अन्यस्त्रीगर्भजातं न (त्वया) एषः महान् मनोरथः वृथा किं क्रियते ।

**शब्दार्थः** - असम्भूय - जन्म अप्राप्य (जन्म न पाकर)

**विनिःश्वस्येति कथिते तस्मिन् पुत्रेण दुर्मनाः ।**
**श्वासक्षामेक्षणा दीना सुनीतिर्वाक्यमब्रवीत् ॥7॥**

**अन्वयः** - पुत्रेण तस्मिन् कथिते विनिःश्वस्य श्वासक्षामेक्षणा दीना दुर्मनाः सुनीतिः वाक्यम् अब्रवीत् ।

**शब्दार्थः** - दुर्मनाः - दुःखिता

क्षामेक्षणा - क्षीणदृष्टियुता (कमजोर दृष्टि वाली)

अब्रवीत् - अवदत्

**सुरुचिः सत्यमाहेदं मन्दभाग्योऽसि पुत्रक ।**
**यस्य यावत्स तेनैव स्वेन तुष्यति मानवः ॥8॥** 8

**अन्वयः** - पुत्रक ! मन्दभाग्यः असि । सुरुचिः इदं सत्यम् आह । यस्य यावत् सः मानवः तेन एव स्वेन तुष्यति ।

**शब्दार्थः** - स्वेन - धनेन

तुष्यति - सन्तुष्टः भवति

आह - अवदत्

**नान्यद्दत्तमभीप्सामि स्थानमम्ब ! स्वकर्मणा ।**
**इच्छामि तदहं स्थानं यन्न प्राप पिता मम ॥9॥**

**अन्वयः** - अम्ब ! अहं अन्यद्दत्तस्थानं न अभीप्सामि । स्वकर्मणा तत् स्थानम् इच्छामि यत् मम पिता न प्राप ।

**शब्दार्थः** - अभीप्सामि - इच्छामि

प्राप - आप्नोत्

स्वकर्मणा - निजप्रयत्नेन

**निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।**

**पुराच्च निर्गम्य ततस्तद्बाह्योपवनं ययौ ॥10॥**

**अन्वयः** - ध्रुवः मातरम् इति उक्त्वा मातुः गृहात् निर्जगाम। ततः पुरात् च निर्गम्य तत् बाह्योपवनं ययौ।

| | | |
|---|---|---|
| **शब्दार्थः** - निर्जगाम | - | बहिः निर्गतः |
| पुरात् | - | नगरात् (नगर से) |
| ययौ | - | अगच्छत् |

**स ददर्श मुनींस्तत्र सप्त पूर्वागतान्ध्रुवः ।**

**स राजपुत्रस्तान्सर्वान् प्रणिपत्याभ्यभाषत ॥11॥**

**अन्वयः** - स ध्रुवः तत्र पूर्वागतान् सप्त मुनीन् ददर्श। स राजपुत्रः तान् सर्वान् प्रणिपत्य अभ्यभाषत्।

| | | |
|---|---|---|
| **शब्दार्थः** - ददर्श | - | अपश्यत् (देखा) |
| प्रणिपत्य | - | प्रणम्य |
| सप्तमुनीन् | - | सप्तर्षीन् ((सात ऋषियों को)) |

**नाहं राज्यमभीप्सामि न राज्यं द्विजसत्तमाः ।**

**तत्स्थानमेकमिच्छामि भुक्तं नान्येन यत्पुरा ॥12॥**

**अन्वयः** - द्विजसत्तमाः, न अहं राज्यमभीप्सामि न राज्यं (च)। (अहं) तत् एकं स्थानम् इच्छामि यत् पुरा अन्येन न भुक्तम्।

| | | |
|---|---|---|
| **शब्दार्थः** - द्विजसत्तमाः | - | श्रेष्ठविप्राः (श्रेष्ठ ब्राह्मणों) |
| भुक्तम् | - | लब्धम् |
| अभीप्सामि | - | इच्छामि |

**अनाराधितगोविन्दैर्नरैः स्थानं नृपात्मज ।**

**न हि सम्प्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम् ॥13॥**

**अन्वयः** - नृपात्मज ! अनाराधितगोविन्दैः नरैः श्रेष्ठं स्थानं न हि सम्प्राप्यते। तस्मात् अच्युतम् आराधय।

| | | |
|---|---|---|
| **शब्दार्थः** - नृपात्मज | - | राजपुत्र |
| अनाराधितम् | - | आराधनं विना |
| अच्युतम् | - | विष्णुम् |

**निशम्यैतदशेषेण मैत्रेय नृपतेः सुतः ।**

**निर्जगाम वनात्तस्मात्प्रणिपत्य स तानृषीन् ॥14॥**

**अन्वयः** – मैत्रेय अशेषेण एतद् निशम्य स नृपतेः सुतः तान् ऋषीन् प्रणिपत्य तस्मात् वनात् निर्जगाम।

**शब्दार्थः** –

| | | |
|---|---|---|
| निशम्य | - | श्रुत्वा |
| निर्जगाम | - | निर्गतः (चला गया) |
| अशेषेण | - | समग्रेण (सम्पूर्ण) |

**भगवानपि सर्वात्मा तन्मयत्वेन तोषितः।**
**गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥15॥**

**अन्वयः** – भगवान् सर्वात्मा चतुर्भुजवपुर्हरिः अपि तन्मयत्वेन तोषितः गत्वा ध्रुवम् इदम् उवाच।

**शब्दार्थः** –

| | | |
|---|---|---|
| वपुः | - | देहः (शरीर) |
| तन्मयत्वेन | - | तल्लीनत्वेन (तल्लीनता से) |
| तोषितः | - | तुष्टीकृतः (सन्तुष्ट) |

**औत्तानपाद ! भद्रं ते तपसा परितोषितः।**
**वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ॥16॥**

**अन्वयः** – औत्तानपाद ! ते भद्रम् अहं तपसा परितोषितः वरदः अनुप्राप्तः। सुव्रत, वरं वरय।

**शब्दार्थः** –

| | | |
|---|---|---|
| औत्तानपाद | - | उत्तानपादसुत |
| भद्रम् | - | कल्याणम् |
| अनुप्राप्तः | - | आगतः |

**आधारभूतं जगतः सर्वेषामुत्तमोत्तमम्।**
**प्रार्थयामि प्रभो ! स्थानं त्वत्प्रसादादतोऽव्ययम् ॥17॥**

**अन्वयः** – प्रभो ! त्वत् प्रसादात् जगतः आधारभूतं सर्वेषाम् उत्तमोत्तमम् अतः अव्ययं स्थानं प्रार्थयामि।

**शब्दार्थः** –

| | | |
|---|---|---|
| प्रसादात् | - | कृपया (कृपा से) |
| प्रार्थयामि | - | प्रार्थनां करोमि |
| अव्ययम् | - | अक्षयम् |

**सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः।**
**सर्वेषामुपरि स्थानं तव दत्तं मया ध्रुव ॥18॥**

**अन्वयः** – ध्रुव, अशेषाणां सप्तर्षीणां ये च वैमानिकाः सुराः, मया तव सर्वेषाम् उपरि स्थानं दत्तम्।

**शब्दार्थः** –

| | | |
|---|---|---|
| अशेषाणाम् | - | समस्तानां सर्वेषाम् |
| वैमानिकाः | - | विमानेन चारिणः (विमान से विचरण करने वाले) |
| सुराः | - | देवाः |

## अभ्यासः

1. **एकपदेन उत्तरत –**

(क) स्वायम्भुवस्य मनोः पुत्रौ कौ ?

(ख) उत्तमः कस्याः सुतः ?

(ग) ध्रुवस्य जननी का ?

(घ) ध्रुवः राजासनस्थितस्य नृपस्य अङ्के कम् अपश्यत् ?

(ङ) सः ध्रुवः वने कान् ददर्श ?

2. **एकवाक्येन उत्तरत –**

(क) सुरुचिः ध्रुवं किमवदत् ?

(ख) ध्रुवस्य कः मनोरथः ?

(ग) ध्रुवः पूर्वागतान् कान् ददर्श ?

(घ) ध्रुवः किं किं नेच्छति ?

(ङ) हरिः आगत्य किमुक्तवान् ?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत –**

(क) सुनीतिः ध्रुवं किमब्रवीत् ?

(ख) ध्रुवः सप्तर्षीन् प्रणिपत्य किमुक्तवान् ?

(ग) ध्रुवः अन्ते किं पदमगच्छत् ?

4. **रिक्तस्थानानि पूरयत –**

(क) उत्तानपादः ................................ पिता।

(ख) उत्तमस्य माता .................................... ।

(ग) अङ्कारोहणं ध्रुवस्य ............................ आसीत्।

(घ) ध्रुवः तपसे .............................. गतः।

(ङ) गत्वा ध्रुवमुवाचेदं ............................... ।

5. **युग्ममेलनं कुरुत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | भगवद्भक्तः | ध्रुवाय |
| (ख) | तपः कृतम् | ध्रुवः |
| (ग) | हरिः वरं दत्तवान् | ध्रुवस्य |
| (घ) | उत्तमः भ्रातोऽस्ति | ध्रुवेण |

6. अधोलिखितपदानां विभक्तिं वचनं च लिखत -

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| मनोः | | |
| तयोः | | |
| राज्ञः | | |
| कस्याम् | | |
| उदरे | | |
| पुत्रेण | | |
| मातरम् | | |
| मुनीन् | | |
| नरैः | | |
| प्रसादात् | | |
| मया | | |
| सर्वेषाम् | | |

7. अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| अकरोत् | | | | |
| इच्छामि | | | | |
| अपश्यत् | | | | |
| प्रार्थयामि | | | | |
| आराधय | | | | |
| तुष्यति | | | | |

8. प्रकृतिप्रत्ययौ पृथक् कुरुत -

(क) निर्गम्य

(ख) भुक्तम्

(ग) निशम्य

(घ) प्रणिपत्य

(ङ) दृष्ट्वा

**9. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

(क) तयोरुत्तानपादस्य

(ख) सुनीतिर्नाम

(ग) दृष्ट्वोत्तमम्

(घ) तमारोढुम्

(ङ) मनोरथम्

(च) तदहम्

(छ) पुराच्च

**10. नामोल्लेखपूर्वकं समासविग्रहं कुरुत –**

(क) महावीर्यः

(ख) प्रियव्रतोत्तानपादौ

(ग) राजपुत्रः

(घ) मन्दभाग्यः

(ङ) सुरुचिः

(च) सुनीतिः

(छ) चतुर्भुजः

(ज) नृपात्मजः

**योग्यता विस्तारः –**

- ध्रुवस्य मूलकथां पठत।
- अन्यबालभक्तानां कथां चित्वा लिखत पठत च।